# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,** भारतं [1]**[सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादिनं सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं]** विधातुं तस्य समस्तान् नागरिकांश्च-

सामाजिकम् आर्थिकं राजनीतिकं च **न्यायं;**

विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य उपासनायाश्च **स्वतन्त्रतां;**

प्रतिष्ठायाः, अवसरस्य च **समतां;**

प्रापयितुं, तेषु सर्वेषु च

व्यक्तिगौरवस्य [2][राष्ट्रस्य एकतायाः अखण्डतायाश्च] सुनिश्चायिकां **बन्धुतां** वर्धयितुं;

कृतदृढसङ्कल्पाः **अस्याम् अस्मदीयायां संविधानसभायाम्** अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने (२००६ तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ) **एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे।**

---

[1] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

[2] उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।